माहेश्वरी, स्त्री, (महेश्वरस्यायम् । महेश्वर+अण्, ङीप् । ) यवतिक्ता । इति राजनिर्घण्टः । दुर्गा ॥ (यथा, महाभारते । १४ । ४३ । १४ ।
"भगदेवानुयातायां सर्व्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्व्वती हि सा ॥")
मातृ-भेदः । इति शब्दरत्नावली ॥ ( यथा, मन्त्रकोषे । ६ । ॐ ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा । ) विष्णुः । यथा,—
कन्या उचुः ॥
"कस्त्वं विभ्राजसे कान्त्या केयं वा नवविप्रभा ।
कोन्वयं भाति वपुषा पङ्कजायतलोचनः ॥
निशम्य तासां वचनं वृषेन्द्रवरवाहनः ।
व्याजहार महायोगी भूताधिपतिरव्ययः ॥
अयं नारायणो गौरी जगन्माता सनातनः ।
विभज्य संस्थितो देवः स्वात्मानं बहुधेश्वरः ॥
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ।
एकोऽयं देवदेवात्मा भवानी विष्णुरेव च ॥
अहं हि निष्क्रियः शान्तः केवलो नित्यविग्रहः ।
मामेव केशवं देवमाहुर्देवीमथाम्बिकाम् ॥
एष धाता विधाता च कारणं कार्य्यमेव च ।
कर्त्ता कारयिता विष्णुर्भुक्तिमुक्तिफलप्रदः ॥
भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृक् ।
स्रष्टा धाता वासुदेवो विश्वात्मा विश्वतोमुखः ॥
कूटस्थो ह्यक्षरो व्यापी योगी नारायणः स्वयम् ।
तारकः पुरुषो ह्यात्मा केवलं परमं पदम् ॥
एषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना ।
शान्ता सत्या सदानन्दा परं पदमिति श्रुतिः ॥
अस्याः सर्व्वमिदं जातमत्रैव लयमेष्यति ।
एषैव सर्व्वभूतानां गतीनामुत्तमा गतिः ॥"
इति कौर्म्मे १४ अध्यायः ॥
(पीठस्थानभेदः । इति देवीभागवते ।७।३०।७२।
महेश्वरेण कृतम् । महेश्वर+अण् । क्ली । उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १६ ।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम् ।
एतान्युपपुराणानि कथितानि महात्मभिः ॥"
महेश्वरसम्बन्धिनि, त्रि । यथा, मार्कण्डेये । १०६ । ७९ ।
"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः ।
त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रसीदतु ॥")

मि डु ञ न क्षेपे । इति कविकल्पद्रुमः ॥ ( स्वा०-उभ०-सक०-अनिट् । ) डु मिचिमम् । ञ न मिनोति मिनुते । इति दुर्गादासः ॥

मिच्छ, श बाधे । इति कविकल्पद्रुमः ॥ ( तुदा०-पर०-सक०-सेट् । ) श मिच्छती मिच्छन्ती । बाधो विहतिः । इति दुर्गादासः ॥

मितः, त्रि, ( मा+क्तः "द्यतिस्यतिमास्थामित्ति किति ।" ७ । ४ । ४० । इत्याकारस्येकारादेशः । ) परिमितः । शब्दितः । क्षिप्तः । इति माधातोर्मिधातोश्च क्तप्रत्ययेन निष्पन्नम् ॥ ( यथा, भागवते । ८ । १३ । ३६ ।
"रात्रंश्चतुर्द्दशैवानि त्रिकालानुगतानि ते ।
प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्य्ययः ॥"
यथा च नैषधचरिते । ६ । ८ ।
"मितञ्च सारञ्च वचो हि वाग्मिता ॥")

मितङ्गमः, पुं, स्त्री, ( मितं परिमितं गच्छतीति । गम+"प्रियवशेवदः खच् ।" ३।२।३८ । इत्यत्र "खच् प्रकरणे गमेः सुप्युपसंख्यानम् ।" इति काशिकोक्तेः खच् । मुम् च । ) हस्ती । इति सिद्धान्तकौमुदी ॥ परिमितगामिनि, त्रि ॥

मितद्रुः, पुं, ( मितं द्रवतीति । द्रु+"हरिमितयोर्द्रुवः ।" उणा० १ । ३५ । इति कुः । स च डित् । ) समुद्रः । इति हेमचन्द्रः । ४ । १३६ ॥ (परिमितगतौ, त्रि । यथा, ऋग्वेदे ।४।६।५।
परित्मना मितद्रुरेति होताग्निर्मन्द्रो मधुवचा
ऋतावा ।"
"मितद्रुः परिमितगतिः सन् ।" इति तद्भाष्ये सायणः ॥ मितमार्गे च । यथा, अत्रैव । १० । ६४ । ६ ।
"तेनो अर्वन्तोहवनश्रुतोहवं विश्वे शृण्वन्तु
वाजिनो मितद्रवः ।"
"मितद्रवो मितमार्गाः अध्वानं परिच्छिन्दन्तः ।"
इति तद्भाष्ये सायणः ॥")

मितम्पचः, त्रि, कृपणः । इत्यमरः ॥ ३ । २ । ४८ ॥ ( मितं परिमितं पचतीति । मित+पच्+"मितनखे च ।" ३ । २ । ३४ । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६३ । इति मुम् च ।) परिमितपाककर्त्ता च ॥

मिताशनः, त्रि, परिमितभोजी । मितमश्नाति यः इति व्युत्पत्त्या कर्त्तरि (ल्यु) अनप्रत्ययेन निष्पन्नः ॥

मितिः, स्त्री, (मीयते इति । मा+भावे क्तिन् ।) मानम् । विज्ञानम् । अवच्छेदः । इति शब्दरत्नावली ॥ ( यथा, कुसुमाञ्जलौ । ४६ । ४ ।
"मितिः सम्यक् परिच्छित्तिः ॥")

मित्त्रं, क्ली, ( मिनोति मानं करोति इति । "अमिचिमिदिशसिभ्य क्त्रः ।" उणा० ४ । १६३ । इति क्त्रः । ) शत्रोः परम् । इत्यमरः । २ । ८ । ६ ॥ अतः शत्रोः परमवस्थितो राजा मित्त्रं उपकारित्वात् । मेद्यति स्निह्यतीति चासुसिति त्रः निपातात् गुणाभावः । द्वितकारं एकतकारञ्चेत्येके । इति तट्टीकायां भरतः ॥ अपि च ।
"राजा शत्रुरिति ख्यात एकार्थाभिनिवेशतः ।
भूम्येकान्तरितो राजा स मित्त्रं मित्त्रकार्य्यतः ॥"
इति शब्दरत्नावली ॥

मित्रं, क्ली, बन्धुः । मिता इति भाषा । तत्पर्य्यायः । सखा २ सुहृत् ३ । इत्यमरः । २ । ८ । १२ ॥ माययति जानाति सर्व्वं मित्रं मी कि गत्वां नाम्नीति डित्रः मित्रमजहल्लिङ्गम् । निपातात्तस्य द्वित्वे द्वितकारञ्च । इति तट्टीकायां भरतः ॥ तच्चतुर्व्विधम् । सहार्थः १ भजमानः २ सहजः ३ कृत्रिमः ४ । इति महाभारते राजधर्म्मः ॥ * ॥ मित्रत्वोत्पत्तिर्यथा,—
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचि-
द्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥"
वर्ज्यमित्रं यथा,—
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत् ॥
कुमित्रे नास्ति विश्वासः कुराजे नास्ति
जीवितम् ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं मायामयमरिन्तथा ॥"
विश्वस्तस्यैव मित्रत्वं यथा,—
"सा श्रीर्या न मदं कुर्य्यात् स सुखी तृष्णयोज्-
झितः ।
तन्मित्रं यस्य विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुडे १३ । १४ । १५ । अध्यायाः ॥ * ॥
मित्रप्रशंसादिर्यथा,—
"यस्य मित्रेण संभाषो यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥
यानि कानि च मित्राणि कर्त्तव्यानि शतानि च ।
पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि
पण्डितः ॥
अपुत्त्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्व्वशून्या दरिद्रता ॥"
इति हितोपदेशः ॥

मित्रः, पुं, सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥ (यथा, गोः रामायणे । २ । २५ । २२ ।
"स्वस्ति मित्रः सहादित्यैः स्वस्ति रुद्रा दिशन्तु
ते ॥")
द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५ ।
"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।"
मरुतामन्यतमः । यथा, हरिवंशे ।१६६।५२।
"मरुत्वती मरुत्वन्तो देवानजनयत् सुतान् ।
अग्निश्चक्षुर्हविर्ज्योतिः सावित्रो मित्र एव च ॥"
वशिष्ठस्य ऊर्ज्जागर्भजातः पुत्त्रभेदः । यथा, भागवते । ४ । १ । ३७ ।
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ।
उल्बणो वसुभृद्द्यानो द्युमान् शक्त्यादयो-
ऽपरे ॥")

मित्रयुः, त्रि, ( मित्रं यातीति । या+"क्याच्छन्दसि ।" ३ । २ । १७० । इति उः । ) मित्रवत्सलः । इति हेमचन्द्रः । ३ । १५३ ॥

मित्रयुः, पुं, ( मित्रं यातीति । या+"मृगय्वादयश्च ।" उणा० १ । ३८ । इति कुः । निपातितश्च । ) लोकयात्रिकः । इत्युणादिकोषः । संक्षिप्तसारोणादिवृत्तिश्च ॥ (ऋषिभेदः सलोमहर्षणशिष्यः । यथा, विष्णुपुराणे । ३।६।१८ ।
"सुमतिश्चाग्निवर्चाश्च मित्रयुः शांशपायनः ॥)